मुत्तुस्वामि दीक्षितर् विरचित

# गणेश कीर्तनानि

*typeset using $\LaTeX\ 2_\varepsilon$, pdf$\LaTeX$, hyperref*

*and Type I dvng fonts*

©September 2002

# Contents


1 vātāpigaṇapatim 5

2 śrīmūlādhāracakra 6

3 siddhivināyakam 7

4 vāmāṅkasthitayā 8

5 pañcamātaṇgamukha 9

6 vallabhānāyakasya 10

7 mahāgaṇapatim 11

8 mahāgaṇapate 12

9 mahāgaṇapatiṃ vande 13

10 gaṇeśakumāra 14

11 gaṇarājena 15

12 gaṇanāyakam 16

13 śrīmahāgaṇapatiravatu 17

14 hastivadanāya 19

15 ucciṣṭagaṇapatau 21

16 vighneśvaram 22

17 lambodarāya 23

18 śvetagaṇapatim 24

19 karikaḷabhamukham 25

20 śrīgaṇeśātparam 26

21 gajānanayutam 27

22 vināyaka 28

23 raktagaṇapatim 29

24 ekadantaṃa bhajeham 30

25 śrīgaṇanātham 31

**26 herambāya** **32**

**27 śaktisahitagaṇapatim** **33**

## 1 vātāpigaṇapatim

# वातापिगणपतिं भजेऽहम्

रागम्: हंसध्वनि (२९) ताळम्: आदि

पल्लवि

वातापिगणपातिं भजेऽहं वारणास्यं वरप्रदम् श्री

अनुपल्लवि

भूतादिसंसेवितचरणं भूतभौतिकप्रपञ्चभरणं
वीतरागिणं विनतयोगिनं विश्वकारणं विघ्नवारणम्

चरणम्

पुरा कुम्भसंभवमुनिवरप्रपूजितं त्रिकोणमध्यगतं
मुरारिप्रमुखाद्युपासितं मूलाधारक्षेत्रस्थितम्
परादिचत्वारिवागात्मकं प्रणवस्वरूपवक्रतुण्डं
निरन्तरं निटिलचन्द्रखण्डं निजवामकरविधृतेक्षुदण्डम्
कराम्बुजपाशबीजापूरं कलुषविदूरं भूताकारं
हरादिगुरुगुहतोषितबिम्बं हंसध्वनिभूषितहेरम्बम्

✠ ✠ ✠ ✠ ✠

## 2 śrīmūlādhāracakra

# श्री मूलाधारचक्रविनायक

रागम्: श्री (२२)    ताळम्: आदि

पल्लवि

श्री मूलाधारचक्रविनायक अमूल्यवरप्रदायक

अनुपल्लवि

मूलाज्ञानशोकविनाशक मूलकन्दमुक्तिप्रदायक

चरणम्

सकळीकृतदेवादिदेव शबळीकृतसर्वज्ञस्वभाव

प्रकटीकृतवैखरीस्वभाव पराभव प्रसिद्धगजग्रीव

विकट षट्शतश्वासाधिकार विचित्राकार भक्तोपकार

अकळङ्कविभास्वर विघ्नेश्वर हरगुरुगुहसोदरलम्बोदर

✠ ✠ ✠ ✠ ✠

## 3 siddhivināyakam

# सिद्धिविनायकम्

रागम्: चामरम् (५६) तालम्: रूपकम्

### पल्लवि

सिद्धिविनायकं अनिशं चिन्तयाम्यहं प्र-
सिद्धगणनायकं विशिष्टार्थदायकं वरम्

### अनुपल्लवि

सिद्धयक्षकिन्नरादिसेवितं अखिलजगत्-
प्रसिद्धं मूलपङ्कजमध्यस्थं मोदकहस्तम्

### चरणम्

भाद्रपदमासचतुर्थ्यां ब्रह्मणादिपूजितं

पाशाङ्कुशधरं छत्रचामरपरिवीजितम्

रौद्रभावरहितं दासजनहृदयविराजितं

रौहिणेयानुजार्चितं ईहनावर्जितम्

अद्रिराजसुतात्मजं अनन्तगुरुगुहाग्रजं
भद्रप्रदपदाम्बुजं भासमानचतुर्भुजम्

✠ ✠ ✠ ✠ ✠

## 4 vāmāṅkasthitayā

# वामाङ्कस्थितया

रागम्: अठाणा (२९) ताळम्: खण्ड एकम्

पल्लवि

वामाङ्कस्थितया वल्लभयाऽऽश्लिष्टं
वारणवदनं देवं वन्देऽहम्

अनुपल्लवि

वामनस्वरूपं वरदं सचापं चामरकर्णं शशिशेखरतनयं
नामरूपधरं अभिनवगुरुगुहहृदयम्

चरणम्

अष्टाङ्गयोगवरहठाणवादिजय-
वसिष्टादितपोधनसेवितगणनाथम्
सृष्ट्यादिकारणं श्रितपालनं हेतुदृष्टान्तवर्जितं देवतापूजितम्
दुष्टविघ्नहरणं शिष्टभक्तभरणं
इष्टफलदचरणं शिष्टहृदिहरणम्

✠ ✠ ✠ ✠ ✠

## 5 pañcamātaṇgamukha

# पञ्चमातङ्गमुखगणपतिना

रागम्: मलहरि (१५)   ताळम्: रूपकम्

पल्लवि

पञ्चमातङ्गमुखगणपतिना
परिपालितोऽहं सुमुखेन श्री

अनुपल्लवि

पञ्चभूतात्मकप्रपञ्चोदयादिकरण-
विरिञ्चिहरिरुद्रनुतेन पञ्चवक्त्रशिवसुतेन

चरणम्

वरदाभयपाशसृणिकपालदन्त-
मोदकमुद्गराक्षमालाकरेण
कमलापुरविहारेण पुरुहूता-
द्यखिलदेवपूजितविघ्नेश्वरेण
वरगुरुगुहसोदरेण सुरुचिरलम्बोदरेण
करुणार्द्रगौरतरेण कलिमलहरणचतुरेण

✠ ✠ ✠ ✠ ✠

## 6 vallabhānāyakasya

# वल्लभानायकस्य

रागम्: बेगड (२९) ताळम्: रूपकम्

### पल्लवि

वल्लभानायकस्य भक्तो भवामि
वाञ्छितार्थदायकस्य वरमूषिकवाहनस्य

### समष्टिचरणम्

पल्लवपदमृदुतरस्य पाशाङ्कुशादिधरस्य
मल्लिकाजातीचंपकहारस्य मणिमालस्य
वल्लीविवाहकारणस्य गुरुगुहपूजितस्य
काळीकलामालिनीकमलाक्षीसन्नुतस्य

✠ ✠ ✠ ✠ ✠

## 7 mahāgaṇapatim

# महागणपतिम्

रागम्ः नाट (३६) ताळम्ः चतुरश्र एकम् पल्लवि

महागणपतिं मनसा स्मरामि
वसिष्ठवामदेवादिवन्दितम्

समष्टिचरणम्

महादेवसुतं गुरुगुहनुतं मारकोटिप्रकाशं शान्तं
महाकाव्यनाटकादिप्रियं मूषिकवाहनमोदकप्रियम्

✠ ✠ ✠ ✠ ✠

## 8 mahāgaṇapate

# महागणपते

रागम्: नटनारायणि (२८) तालम्: आदि

### पल्लवि

महागणपते पालयाशु मां
मायामयवल्लभापते श्री

### समष्टिचरणम्

महानटनारायणीनन्दन मानितदेवदेवकीनन्दन
महेश्वरगुरुगुहभक्तचन्दन मातङ्गवदनेन्द्रादिवन्दन

✠ ✠ ✠ ✠ ✠

## 9 mahāgaṇapatiṃ vande

# महागणपतिं वन्दे

रागम्: तोडि (८) ताळम्: रूपकम्

पल्लवि

महागणपतिं वन्दे माधवाद्यमरवृन्दम्

अनुपल्लवि

अहन्तादिरहितं शक्तिसहितं
आनन्ददन्तं तमेकदन्तम्

चरणम्

त्रिपुरवधार्यं शिवेन त्र्यम्बकेनार्चितं

उपनिषत्प्रतिपादितं उमामहेश्वरसुतम्

कपिलवसिष्ठादिनतं कञ्जजादिभिरीडितं

कपिलं कृष्णपूजितं करिवदनसुशोभितम्

सुपर्णवाहसेवितं सुरगुरुगुहभावितं
कपित्थाम्रपनसजम्बूकदलीफलभक्षितम्

✠ ✠ ✠ ✠ ✠

## 10 gaṇeśakumāra

# गणेशकुमार

रागम्: जुंजूटि (२८)    ताळम्: चतुरश्र एकम्

पल्लवि

गणेशकुमार पाहि मां गजमुख

समष्टिचरणम्

(मम) मनोरथसिद्धिदायकागमपदादिनुत
भव श्री गुरुगुहहित गजमुख

✠ ✠ ✠ ✠ ✠

## 11 gaṇarājena

# गणराजेन

रागम्: आरभि (२९)    ताळम्: मिश्र चापु

पल्लवि

गणराजेन रक्षितोऽहं गुणिजनादिनुतपल्लवपदेन

समष्टिचरणम्

अणिमाद्यष्टसिद्धिप्रदेन माणिक्यमकुटादिधरेण

मन्त्रिणीपूजितसुमुखेन मानितगुरुगुहवन्दितेन

दिनकरकोटिप्रकाशेन विनताश्रितमन्दारेण

मनुपूजितपाशाङ्कुशेन काननस्थितब्रह्मचर्येण

✠ ✠ ✠ ✠ ✠

## 12 gaṇanāyakam

# गणनायकम्

रागम्: रुद्रप्रिया (२२)  ताळम्: आदि

### पल्लवि

गणनायकम् भजेऽहं भजे
कमलेशनुतं कामरिपुसुतम्

### अनुपल्लवि

अणिमादिसिद्धिदायकं सुमुखम्

### चरणम्

वाणीरमणानन्दं वरदं
वदने द्विरदं वरबालगुरुगुहम्

✠ ✠ ✠ ✠ ✠

## 13 śrīmahāgaṇapatiravatu

# श्रीमहागणपतिरवतु माम्

रागम्: गौळ (१५) तालम्: तिश्र त्रिपु,त

पल्लवि

श्रीमहागणपतिरवतु मां
सिद्धिविनायको मातङ्गमुखः श्री

अनुपल्लवि

कामजनक विधीन्द्रसन्नुतकमलालयतटनिवासो
कोमळतरपल्लवपदकरगुरुगुहाग्रजः शिवात्मजः

चरणम्

सुवर्णाकर्षणविघ्नराजो पादाम्बुजो

गौरवर्णवसनधरो फालचन्द्रो

नरादिविनुतलम्बोदरो

कुवलयस्वविषाणपाशाङ्कुश-

मोदकप्रकाशकरो भवजलधिनावो

मूलप्रकृतिस्वभावस्सुखतरो

रविसहस्रसन्निभदेहो

कविजननुत मूषिकवाहो

अवनतदेवतासमूहो

अविनाशिकैवल्यगेहो श्री

✠ ✠ ✠ ✠ ✠

## 14 hastivadanāya

# हस्तिवदनाय

रागम्: नवरोज् (२९) तालम्: मिश्र चापु

पल्लवि

हस्तिवदनाय नमस्तुभ्यं
हाटकमयमण्डपे सिंहासनस्तिताय

अनुपल्लवि

हस्तिकृत्तिवसनधरार्चित महागणपाय

तत्वस्वरूपाय समस्तभक्तानुग्रहाय
मायालिङ्गितविग्रहाय

चरणम्

कमलोत्पलपाशशङ्खचक्रेक्षु-

कार्मुकव्रीह्यग्रगदानिजविषाण-

मातुलङ्गरत्नकलशधरण-

कराम्बुजाय पदपङ्कजाय विमलाय

विश्वोत्पत्तिस्थितिविलयाय करुणालयाय

हिमाद्रितनयाननपङ्कजहिरण्यगर्भाय

सुमनसे उमारमणकुमारगुरुगुह-
समानवरौजसे महसे

✠ ✠ ✠ ✠ ✠

## 15 uccisṭagaṇapatau

# उच्छिष्टगणपतौ

रागम्: काशीरामक्रिय (५१)  ताळम्: आदि

पल्लवि

उच्छिष्टगणपतौ भक्तिं कृत्वोन्नतपदवीं
व्रज रे रे हृदय

अनुपल्लवि

सच्छब्दवाच्यस्वरूपिणि शबळीकृतब्रह्मस्वरूपिणि
चिच्छक्तिस्फूर्तिस्वरूपिणि

चरणम्

नारीयोनीमुखास्वादने नग्नरामक्रियामोदने

भेरिवीणावेणुवादने भेदाज्ञानध्वान्तसूदने

शौरिनुते नतगुरुगुहमदने सूरिजनयुतश्रीपुरसदने
दूरीकृतमहादुरितकदने गौरीशनन्दने गजवदने

✠ ✠ ✠ ✠ ✠

## 16 vighneśvaram

# विघ्नेश्वरम्

रागम्: मलहरि (१५) ताळम्: आदि

### पल्लवि

विघ्नेश्वरं भजरे मानस
विधिगुरुगुहपूजितवरं श्री

### अनुपल्लवि

विघ्नवारणविनायकमनिशं
वीरादिविनुतविघ्नराजम्

### चरणम्

श्वेताम्बरधरं श्वेतार्कपुष्पमालावृतं
पाशाङ्कुशधरं पन्नगाभरणप्रियकरम्
प्रणतभक्तार्तिभञ्जनं चतुरतरं
भूतगणादिसेवितपल्लवपादपङ्कजपद्मकरम्
भूतभौतिकप्रपञ्चाधिभरणं
भवपाशमोचनं शुभकरम्

✠ ✠ ✠ ✠ ✠

## 17 lambodarāya

# लम्बोदराय

रागम्: वराळि (३९) तालम्: खण्ड चापु

पल्लवि

लम्बोदराय नमस्ते श्री

समष्टिचरणम्

कुम्भजपूजिताय इभवदनवरदाय

अभयवरप्रदाय अम्बुजासननुताय

साम्बशिवात्मजाय जम्बूकदलीफल-
सारभक्षिताय गुरुगुहाग्रजाय

✠ ✠ ✠ ✠ ✠

## 18 śvetagaṇapatim

# श्वेतगणपतिम्

रागम्: रागचूडामणि (३२)    ताळम्: त्रिपुट

पल्लवि

श्वेतगणपतिं वन्दे वामदेवप्रतिपाद्यमनाद्यम्

समष्टिचरणम्

भूतगणादिसंसेवितं बुद्धगुरुगुहसंभावितं
मातङ्गमुखं वल्लभासमेतं विरागचूडामणिम्

✠ ✠ ✠ ✠ ✠

## 19 karikaḷabhamukham

# करिकळभमुखम्

रागम्: सावेरि (१५) तालम्: रूपकम्

पल्लवि

करिकळभमुखं ढुंढिगणेशं भज रे रे चित्त
कावेरीतटस्थितं सावेरीरागनुतम्

अनुपल्लवि

हरिहयादिसकलदेवताराधितपदाम्बुजं
गिरिजातनुजं विजितमनसिजं गुरुगुहाग्रजम्

चरणम्

मूलाधारचतुर्दळपङ्कजमध्यस्थं

मोदकहस्तं मुनिजनहृत्कमलस्थम्

फालचन्द्रं सुमुखं करुणासान्द्रं

पाशाङ्कुशधरं पद्मकरं सुन्दरम्

नीलग्रीवसुकुमारं नीरदशोभाहरं
पालितभक्तं धीरमपारं वारं वारम्

✠ ✠ ✠ ✠ ✠

## 20 śrīgaṇeśātparam

# श्रीगणेशात्परम्

रागम्: आर्द्रदेशि (१५) ताळम्: झंप

पल्लवि

श्रीगणेशात्परं चित्त न हि रे रे
शिवादिषट्त्रिंशत्तत्वस्वरूपिणः

अनुपल्लवि

वागादिपञ्चकव्यापाररहित-
हृदायाकाशसंस्थिताद्योगिराजार्चितात्

चरणम्

मातङ्गवदनादुमारुद्रदर्शितात् भूतभौतिक-
विश्वपूजितकळेभरात् श्वेतार्कसुमधरात् स्वेतर-
विवर्जितात् पीताम्बरावृतात् ब्रह्माद्युपासितात्
भूतादिनुतपदाम्भोजाच्छिवात्मजाच्छीतांशुधर-
परमशिवगुरुगुहाग्रजात्

✠ ✠ ✠ ✠ ✠

## 21 gajānanayutam

# गजाननयुतम्

रागम्: वेगवाहिनि (१६)　　ताळम्: चतुरश्र एकम्

### पल्लवि

गजाननयुतं गणेश्वरं भजामि सततं सुरेश्वरम्

### समष्टिचरणम्

अजेन्द्रपूजितविघ्नेश्वरं गणादिसन्नुतपदपद्मकरं
कुञ्जरभञ्जनचतुरतरकरं गुरुगुहाग्रजं प्रणवाकारम्

✠ ✠ ✠ ✠ ✠

## 22 vināyaka

# विनायक

रागम्ः वेगवाहिनि (१६)  ताळम्ः रूपकम्

पल्लवि

विनायक विघ्ननाशक मां तारय दयानिधे

अनुपल्लवि

अनाथरक्षक आरूढमूषिक
दक्षशिक्षक मोदकभक्षक

चरणम्

शिवगुरुगुहविधिपूजित आश्रितजनपरिपालक

देवराजपुरतोषित वेगवाहिनीवर्धित

रविशशिवह्निनेत्र रतिपतिसन्नुतशुभगात्र
पवनात्मजानन्दकर राममित्र वरपवित्र

✠ ✠ ✠ ✠ ✠

## 23 raktagaṇapatim

# रक्तगणपतिम्

रागम्: मोहनम् (६५)   ताळम्: आदि

### पल्लवि

रक्तगणपतिम् भजेऽहं
रत्नसिंहासनपतिं सुरपतिम्

### अनुपल्लवि

रक्ताम्बरधरं रागद्वेषादिहरं
पार्वतीप्रियकरं मोहनकरम्

### चरणम्

परशुरामक्षेत्रप्रभावं पायसान्नहोमादिविभावं
पञ्चकृत्यातीतस्वभावं भक्तजनादिसमूहवैभवम्
सकलकार्यार्थसिद्धिदं स्थिरं वामदेवादिपूजितं वरं
वारिजभववन्दितवल्लभेशं गुरुगुहनुतं परमशिवसुतम्

✠ ✠ ✠ ✠ ✠

## 24 ekadantaṃa bhajeham

# एकदन्तं भजेऽहम्

रागम्: बिलहरि (२९) ताळम्: मिश्र चापु

पल्लवि

एकदन्तं भजेऽहं एकानेकफलप्रदम्

अनुपल्लवि

पाकशासनाराधितं पामरपण्डितादिनुतपदम्

चरणम्

कैलासनाथकुमारं कार्तिकेयमनोहरं

हालास्यक्षेत्रवेगवतीतटविहारं हरम्

कोलाहलगुरुगुहसहितं कोटिमारलावण्यहितं
मालाकङ्कणादिधरणं माषावल्लभाम्बारमणम्

✠ ✠ ✠ ✠ ✠

## 25 śrīgaṇanātham

# श्रीगणनाथं भजरे

रागम्: ईशमनोहरि (२८) ताळम्: रूपकम्

पल्लवि

श्रीगणनाथं भजरे चित्त पराशक्तियुतम्

अनुपल्लवि

नागयज्ञसूत्रधरं नादलयानन्दकरम्

चरणम्

आगमादिसन्नुतं अखिलदेवपूजितं

योगशालिभावितं भोगिशायिसेवितम्

रागद्वेषादिरहितरमणीयहृदयविदितं

श्रीगुरुगुहसंमुदितं चिन्मूलकमलस्थितम्

✠ ✠ ✠ ✠ ✠

## 26 herambāya

# हेरम्बाय

रागम्: अठाणा (२८) ताळम्: रूपकम्

पल्लवि

हेरम्बाय नमस्ते हरिब्रह्मेन्द्रादिसेविताय
शिवकुमाराय

अनुपल्लवि

वीरगणादिमुदिताय वीरादिवरप्रदाय

चरणम्

सूरिजनोपासिताय सुरगुरुगुहसेविताय

परमेश्वरकुमाराय पञ्चहस्ताय पाशाङ्कुशधराय
प्रसिद्धगणनाथाय विनायकाय

✠ ✠ ✠ ✠ ✠

## 27 śaktisahitagaṇapatim

# शक्तिसहित गणपतिम्

रागम्: शङ्कराभरणम् (२९) ताळम्: तिश्र एकम्

### नोट्टु स्वर साहित्यम्

शक्तिसहितगणपतिं शङ्करादिसेवितं

विरक्तसकलमुनिवरसुरराजविनुत गुरुगुहम्

भक्ताळिपोषकं भवसुतं विनायकं
भुक्तिमुक्तिप्रदं भूषिताङ्गं रक्तपादाम्बुजं भावयामि

✠ ✠ ✠ ✠ ✠